# राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## विशिष्टाचार्यप्रवेशपरीक्षा – 2020

## प्रश्नपत्रम्

विषयः – मीमांसा पूर्णाङ्कः - 100

1 "वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलुकृती" इति वाक्येन अन्वेषणा-पदस्य प्रयोगः केन विहितः ?

A माघेन B कालिदासेन

C विष्णुशर्मणा D श्रीहर्षेण

2 अनुसन्धानस्य कोऽर्थः ?

A पुनः पुनः निरीक्षणम्

B समस्यायाः कृते निवारणोपायान्वेषणम्

C वैज्ञानिकोपायैः समस्यायाः सत्यासत्यप्रघटनम्

D विषयविस्तारं कृत्वा शोधप्रबन्धलेखनम्

3 अधोलिखितेषु अनुसन्धानस्य प्रथमं सोपानं किम् ?

A समस्यासहायकसामग्रीसङ्कलम्

B समस्यायाः मूल्याङ्कनम्

C समस्यानिर्वाचनम्

D समस्यासमाधानाय प्रयासः

4 अनुसन्धाने प्रतिपादितानि तथ्यानि कीदृशानि स्युः ?

A नमनीयानि B व्यावहारिकाणि

C मौलिकानि D एतत्सर्वम्

5 अधो लिखितेषु किं पदम् "अनुसन्धानम्" इतिपदेन समानार्थकं न भवति ?

A गवेषणम् B शोधसन्दर्भः

C संशोधनम् D परिशोधनम्

6 गुणात्मकानुसन्धाने अधोलिखितेषु किं नोपयुज्यते ?

A आगमनात्मकविश्लेषणम् (Individual Analysis)

B नैसर्गिकाध्ययनम् (Naturalistic Enquiry)

C अन्तर्दृष्टिः (Insight) D संरचितसाक्षात्कारः (Structured Intervies)

7 “विमर्श” इति शब्दस्य कोऽर्थः ?

A कस्यापि मतस्य व्यङ्ग्यार्थनिर्धारणम्

B कस्यापि मतस्य व्यापकार्थपरिशीलनम्

C कस्यापि मतस्यानुवदनम्

D कस्यापि मतस्य स्वीकारः परिहारो वा

8 “भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी” ग्रन्थः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन कदा प्रकाशितः --

A 2001 B 2002

C 2010 D 2011

9 अधोलिखितेषु चिन्तनशीलप्रश्नः (Reflective Inquiry) कुत्र न प्रचलति ?

A ज्ञानमीमांसायाम् (In epistemology)

B मूल्यमीमांसायाम् (In axiology)

C अध्यात्मशास्त्रे (In metaphysics)

D ऐतिहासिकानुसन्धाने (In historical Research)

10 अधोलिखितेषु किम् ऐतिहासिकानुसन्धानस्य क्षेत्रमुच्यते ?

A अर्थनीतिः B सभ्यता

C अभिलेखः D एतत्सर्वम्

11 आधुनिकोपकरणेषु किं नान्तर्भवति ?

A अन्तर्जालम् B ई - शोधपत्रिका

C ग्रन्थसूची D ई – कोषाः

12 अधोलिखितेषु कानि सामग्रीसङ्कलने प्राथमिकस्रोतांसि भवन्ति ?

A शोधपत्रिकाः B शासकीयानि अभिलेखानि

C साहित्येतिहासः D कोशाः

13 संस्कृतवाङ्मये पुराणानि प्रामुख्येन कीदृशम् अनुसन्धानं सूचयन्ति ?

A ऐतिहासिकम् B दार्शनिकम्

C संख्यात्मकम् D प्रायोगिकम्

14 आगमशास्त्रेषु अनुसन्धानस्य प्रधानं क्षेत्रं किम् ?

A आलयसंस्कृतिः B सौन्दर्यसाधनम्

C आत्मतत्त्वविमर्शः D राजतन्त्रसंस्कृतिः

15 राष्ट्रियपाण्डुलिपि मिषन् इति संस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये　　B तमसो मा ज्येतिर्गमय

C विज्ञानमुपास्व　　D मातृकां रक्षत

16 "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति अनुसन्धानसूत्रं कुत्र वर्तते ?

A तैत्तिरीयोपनिषदि　　B कठोपनिषदि

C बृहदारण्यकोपनिषदि　　D प्रश्नोपनिषदि

17 अनुसन्धानप्रविधेः कृते अपेक्षिताः षोडश पदार्थाः कस्मिन् दर्शने प्राप्यन्ते ?

A वेदान्तदर्शने　　B सांख्यदर्शने

C न्यायदर्शने　　D योगदर्शने

18 अनुसन्धानाय अपेक्षितानि प्रमाण-प्रमेय-विमर्श-निर्णय-प्रवृत्त्याख्यानि तत्त्वानि कुत्र वर्णितानि ?

A युक्तिदीपिकायाम्　　B शृङ्गारप्रकाशे

C रामायणे　　D श्रीमद्भगवद्गीतायाम्

19 "भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च" इति कीदृशम् अनुसन्धानम्?

A सर्वेक्षणम्　　B शास्त्रीयम्

C तुलनात्मकम्　　D क्षेत्रीयम्

20 "विमूढाः नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः" इति कुत्रोक्तम् ?

A रामायणे　　B स्कन्दपुराणे

C गीतायाम्　　D भागवते

21 द्वादशलक्षण्यां उत्तरषट्के अस्य विचारः न प्रतिपादितः ।

A बाधः　　B अधिकारः

C ऊहः　　D तन्त्रः

22 श्लोकवार्तिकस्य व्याख्यानग्रन्थेष्वन्यतमः ।

A न्यायरत्नाकरः　　B दीपशिखा

C नयविवेकः　　D न्यायरत्नमाला

23 भाट्टदीपिकाव्याख्यासु अन्यतमा ।

A विजया B काशिका

C प्रभावली D अजिता

24 अधिकरणलक्षणे एतन्नास्ति ।

A विषयः B प्रयोजनम्

C सङ्गतिः D आश्रयः

25 तण्डुलं पचति इत्यत्र कीदृशं कर्मत्वम् ?

A प्राप्यत्वम् B उत्पाद्यत्वम्

C विकार्यत्वम् D संस्कार्यत्वम्

26 स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् इति युक्तिः कुत्र प्रदर्शितः

A भाट्टनयोद्योते B न्यायरत्नमायायां

C न्यायप्रकाशे D श्लोकवार्तिके

27 धात्वर्थमुख्यविशेष्यत्ववादिनः ।

A वैयाकरणाः B नैय्यायिकाः

C भाट्टाः D प्राभाकराः

28 धर्मे चोदनैवप्रमाणमित्यस्य आशयः भवति ।

A प्रत्यक्षं प्रमाणम् B अर्थापत्तिः प्रमाणम्

C शब्दप्रमाणम् D अनुमानप्रमाणम्

29 स एष यज्ञायुधी यजमानः इत्यादिना शरीरातिरिक्त आत्मस्वरूपं अत्र प्रदर्शितम् ।

A तन्त्ररहस्ये B शाबरभाष्ये

C तन्त्रवार्तिके D न्यायमालायम्

30 वर्णान्तरमविकारः सूत्रमिदं कुत्र अस्ति ।

A नामधेयप्रामाण्याधिकरणे B वाक्याधिकरणे

C शब्दनित्यत्वाधिकरणे D मन्त्राधिकरणे

31 शब्दार्थयोः सम्बन्धनित्यत्वप्रतिपादकं सूत्रम्

A अनित्यसंयोगात् B औत्पत्तिकस्तु

C नादवृद्धिपरा D श्रुतिसामान्यमात्रम्

32 षड्विधिप्रकारेषु प्रथमप्रकारः ।

A दध्ना जुहोति
B सोमेन यजेत
C अग्निहोत्रं जुहोति
D व्रीहिभिर्यजेत

33 पदप्रामाण्यनिरूपणप्रथमाध्यायस्य पादः ।

A चतुर्थः
B तृतीयः
C द्वितीयः
D प्रथमः

34 प्रयुक्तिविचाराध्यायः ।

A पञ्चमः
B नवमः
C तृतीयः
D चतुर्थः

35 व्रीहीनवहन्ति इत्यत्र प्रयोजनम् ।

A दृष्टम्
B अदृष्टम्
C उभयम्
D अनुभयम्

36 विकल्पेनप्राप्तानां मध्ये इतरव्यावृत्तिः ।

A परिसंख्यविधौ
B नियमविधौ
C अपूर्वविधौ
D न कुत्रापि

37 अभिहितान्वयवादिनः ।

A प्राभाकरमीमासकाः
B भाट्टमीमांसकाः
C वैयाकरणाः
D न त्रयोपि

38 न वेदमूला स्मृतिः ।

A मनुस्मृतिः
B याज्ञवल्क्यस्मृतिः
C पराशरस्मृतिः
D शाक्यस्मृतिः

39 जातौशक्तिरिति विचारः कस्मिन्नधिकरणे प्रतिपादितः ।

A चित्राधिकरणे
B वाक्याधिकरणे
C आकृत्यधिकरणे
D व्याकरणाधिकरणे

40 मत्वर्थलक्षणभयात् कर्मनामधेयत्वम् ।

A उद्भिदा यजेत B चित्रया यजेत

C अग्निहोत्रं जुहोति D श्येनेनाभिचरन् यजेत

41 गौणीगुणावबोधकप्रमाणेषु एतन्नास्ति।

A जातिः B भूमः

C प्रशंसा D समवायः

42 फलभावनायां करणत्वम्।

A यागस्य B सोमस्य

C उभययोः D अनुभययोः

43 प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं केन प्रमाणेन।

A स्थान B वाक्य

C प्रकरण D श्रुति

44 व्रीहीन् प्रोक्षति इत्यत्र कीदृशमपूर्वम् ।

A फलापूर्वम् B अङ्गापूर्वम्

C उत्पत्यपूर्वम् D समुदायापूर्वम्

45 विभिन्नधात्वर्थकत्वं नाम।

A शब्दान्तरत्वम् B अभ्यासः

C गुणः D संख्या

46 ब्राह्मणानामग्न्याधानकालः।

A ग्रीष्मकालः B वसन्तकालः

C शरत्कालः D न त्रिष्वपि

47 गोदोहनादीनां।

A क्रत्वर्थत्वम् B पुरुषार्थत्वम्

C उभयार्थत्वम् D न उभयार्थत्वम्

48 सूक्तवाकन्यायः अत्र विचारितः।

A भेदाध्याये B अधिकाराध्याये

C शेषाध्याये D ऊहाध्याये

49 सामर्थ्यं कति विधम् ?

A द्विविधम् B त्रिविधम्

C चतुर्विधम् D पञ्चविधम्

50 उद्देश्यगतसंख्यायाः अविवक्षाविचारः कुत्र विचारितः ।

A संख्याधिकरणे B ग्रहैकत्वाधिकरणे

C भावार्थाधिकरणे D वाक्याधिकरणे

51 धर्मः क्षरति कीर्तनात् इति ।

A श्रुतिः B स्मृतिः

C मन्त्रः D अर्थवादः

52 अङ्गत्वं नाम ।

A अविनाभूतत्वम् B अन्योन्याश्रयत्वम्

C उपकारकत्वम् D पारार्थ्यम्

53 वाजपेयः इत्यत्र कर्मपरत्वेन समासः कः ?

A कर्मधारयः B तत्पुरुषः

C बहुव्रीहिः D द्वन्द्वः

54 श्येनशब्दस्य कर्मनामधेयत्वे निमित्तम् ।

A मत्वर्थलक्षणभयात् B वाक्यभेदभयात्

C तत्प्रख्यशास्त्रात् D तद्व्यपदेशात्

55 मीमासाशास्त्रे शाब्दबोधग्रन्थः ।

A श्लोकवार्तिकम् B भाट्टकौस्तुभः

C तन्त्ररहस्यम् D शास्त्रदीपिका

56 प्रकरणपञ्चिका केन प्रणीता ।

A अनन्तदेवेन B अप्पय्यदीक्षितेन

C शालीकनाथेन D मण्डनमिश्रेण

57 द्वादशलक्षण्याम् अस्मिन् अध्याये अष्टौ पादाः सन्ति।

A पञ्चमाध्याये B सप्तमाध्याये

C दशमाध्याये D एकादशे

58 भाट्टप्रस्थाने प्रमाणानि।

A चत्वारि B षट्

C पञ्च D सप्त

59 दम्पत्योः सहाधिकारः इति विचारः कुत्र प्रतिपादितः

A चतुर्थाध्याये B षष्ठाध्याये

C अष्टमाध्याये D द्वादशाध्याये

60 अपूर्वसद्भावं केन प्रमाणेन कल्प्यते ।

A अनुमानम् B उपमानम्

C शब्दः D अर्थापत्तिः

61 लौकिकप्रमाणेषु अन्यतमः।

A विधिः B मन्त्रः

C स्मृतिः D प्रत्यक्षम्

62 तादात्म्यसम्बन्धः कैः मान्यते ?

A प्राभाकरैः B भाट्टैः

C सांख्यैः D नैयायीकैः

63 रूपत्व-गणत्वादीनां ग्रहणं केन सन्निकर्षेण क्रियते ?

A संयोग B संयुक्तसमवाय

C संयुक्त-समवेत समवाय D समवाय

64 मीमांसकमते सन्निकर्षः कति विधः ?

A त्रिविधः B चतुर्विधः

C षड्विधः D द्विविधः

65 प्रत्यक्षं कतिविधम् ?

A एकविधम् B द्विविधम्

C त्रिविधम् D चतुर्विधम्

66 आकाशस्य गुणत्वं के नाङ्गीकुर्वन्ति ?

A भाट्टाः
B नैयैयिकाः
C प्राभाकराः
D वैशेषिकाः

67 विशेष्यतादि विषयतारहितं ज्ञानम् ।

A प्रत्यक्षम्
B अभावः
C सविकल्पकम्
D निर्विकल्पकम्

68 त्वगिन्द्रियेम अस्य ज्ञानं भवति ।

A शब्द
B स्पर्श
C घ्राण
D रूप

69 तत्वचिन्तामणीकारः ।

A भास्करः
B उदयनः
C गङ्गेशोपाध्यायः
D विष्णुशर्मा

70 लक्ष्यैकदेसवृत्तित्वम् ।

A अतिव्याप्तिः
B अव्याप्तिः
C असंबवम्
D न किमपि

71 नैयायिकमते परार्थानुमाने पञ्चावयवेषु एतन्नास्ति ।

A प्रतिज्ञा
B हेतुः
C उपनयः
D व्याप्तिः

72 गो सदृशो गवयः इत्यत्र प्रमाणं किम् ?

A अनुमानम्
B उपमानम्
C न उभयम्
D उभयम्

73 अनुमितेः कारणम्

A पक्षः
B उदाहरणम्
C हेतुः
D व्याप्तिः

74 अतिदेशनिर्णये किं प्रमाणं सहायकं भवति

A शब्दः
B उपमानम्
C अनुमानम्
D अर्थापत्तिः

75 इह भूतले घटो नास्ति इति ज्ञानं केन प्रमाणेन भवति -

A प्रत्यक्षेण B अभावेन

C अनुमानेन D उपमानेन

76 रूपादिग्रहणं केन सन्निकर्षेण भवति -

A समवाय B संयोग

C संयुक्तसमवाय D समवेतसमवाय

77 अनुमान पञ्चावयवेषु एतन्नास्ति -

A प्रतिज्ञा B निगमनम्

C उपनयः D विशेष्यभावः

78 उपमानस्य पृथक्प्रमाणत्वं के नाङ्गीकुर्वन्ति -

A मीमांसकाः B वेदान्तिनः

C सांख्याः D प्राभाकराः

79 प्रामाण्यमप्रामाण्यमुभयमपि स्वतः इति -

A नैयायिकाः B सांख्याः

C बौद्धाः D प्राभाकराः

80 विशेष्यविशेषणभावसन्निकर्षः एतैः अङ्गीक्रियते -

A मीमांसकैः B बौद्धैः

C नैयायिकैः D वेदान्तिभिः

81 प्रकरणपञ्चिकाकारः -

A मण्डनमिश्रः B नारायणसुधीः

C बादरिः D शालीकनाथः

82 मीमांसकाः अपूर्वसद्भावं केन प्रमाणेन निरूपयन्ति ?

A शब्दः B अनुमानम्

C अर्थापत्तिः D उपमानम्

83 प्रत्यक्षादिप्रमाणानां यत्राप्रवृत्तिः तत्र किं प्रमाणं गृह्यते -

A अर्थापत्तिः B शब्दः

C अनुमानम् D अभावः

84 पञ्चप्रमाणानि इति -

A वैशेषिकाः B नैयायिकाः

C प्राभाकराः D कुमारिलः

85 अर्थापत्तिप्रमाणमनुमाने अन्तर्भवतीति -

A भाट्टाः B प्राभाकराः

C नैयायिकाः D वेदान्तिनः

86 पौराणिकानां कृते एतदपि प्रमाणमेव -

A शब्दः B अनुमानम्

C उपमानम् D ऐतिह्ययोगः

87 भाट्टचिन्तामणिकारः -

A शङ्करभट्टः B गागाभट्टः

C दिनकरभट्टः D गोविन्धभट्टः

88 प्राभाकरसिद्धान्तानुयायिग्रन्थेषु अन्यतमः -

A तन्त्रदर्पणम् B तन्त्ररहस्यम्

C भाट्टदिनकरी D बालप्रकाशः

89 शास्त्रदीपिकाव्याख्यासु अन्यतमा -

A शास्त्रमाला B न्यायकणिका

C युक्तिस्नेहप्रपूरिणी D चन्द्रिका

90 शक्तिग्राहकप्रमाणेषु एतन्नान्तर्भवति -

A व्याकरणम् B अनुमानम्

C व्यवहारः D आप्तवाक्यम्

91 वाक्यार्थबोधं प्रति सहकारिकारणेषु एतन्न भवति -

A योग्यता B सन्निधिः

C आकाङ्क्षा D तात्पर्यम्

92 गङ्गायां घोषः इत्यस्यार्थः -

A गंङ्गा B तीरम्

C प्रवाहः D घोषः

93 प्रमाणान्तराधिगतविषयकं वचनम् -

A स्मृतिः B भ्रमः

C अनुवादः D संशयः

94 स्वाभाविकसम्बन्धो -

A हेतुः B दृष्टान्तः

C साधनम् D व्याप्तिः

95 प्रमाणशास्त्रमिति कस्य प्रसिद्धिः -

A न्यायस्य B व्याकरणस्य

C मीमासायाः D वेदान्तस्य

96 नैयायिकमते अनुमाने कति भेदाः -

A द्वौ B त्रयः

C चत्वारः D पञ्च

97 शब्दवृत्तिषु एतन्नान्तर्भवति -

A गौणी B अभिधा

C संसर्गः D लक्षणा

98 भावनामुख्यविशेष्यत्ववादिनः -

A वैयाकरणाः B नैयायिकाः

C मीमांसकाः D वैशेषिकाः

99 मानमेयोदयग्रन्थे प्रमाणभागस्य कर्ता -

A नारायणभट्टः B नारायणपण्डितः

C नारायणसुधीः D नारायणशास्त्री

100 प्रमाणमनुभूतिस्सा स्मृतेरन्या इति -

A शाबरभाष्ये B प्रकरणपञ्चिकायाम्

C श्लोकवार्तिके D न्यायप्रकाशे

ANSWER KEY

M.Phil – Meemamsa

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| **1** | **B** | **26** | **D** | **51** | **B** | **76** | **B** |
| **2** | **C** | **27** | **A** | **52** | **D** | **77** | **D** |
| **3** | **C** | **28** | **C** | **53** | **C** | **78** | **C** |
| **4** | **D** | **29** | **B** | **54** | **D** | **79** | **B** |
| **5** | **B** | **30** | **C** | **55** | **B** | **80** | **C** |
| **6** | **D** | **31** | **B** | **56** | **C** | **81** | **D** |
| **7** | **D** | **32** | **C** | **57** | **C** | **82** | **C** |
| **8** | **B** | **33** | **A** | **58** | **B** | **83** | **D** |
| **9** | **D** | **34** | **D** | **59** | **B** | **84** | **C** |
| **10** | **D** | **35** | **A** | **60** | **D** | **85** | **C** |
| **11** | **C** | **36** | **B** | **61** | **D** | **86** | **D** |
| **12** | **B** | **37** | **B** | **62** | **B** | **87** | **B** |
| **13** | **A** | **38** | **D** | **63** | **C** | **88** | **B** |
| **14** | **A** | **39** | **C** | **64** | **A** | **89** | **C** |
| **15** | **C** | **40** | **A** | **65** | **B** | **90** | **B** |
| **16** | **C** | **41** | **D** | **66** | **B** | **91** | **D** |
| **17** | **C** | **42** | **A** | **67** | **D** | **92** | **B** |
| **18** | **B** | **43** | **C** | **68** | **B** | **93** | **C** |
| **19** | **D** | **44** | **B** | **69** | **C** | **94** | **D** |
| **20** | **C** | **45** | **A** | **70** | **B** | **95** | **A** |
| **21** | **B** | **46** | **B** | **71** | **D** | **96** | **B** |
| **22** | **A** | **47** | **B** | **72** | **B** | **97** | **C** |
| **23** | **C** | **48** | **C** | **73** | **C** | **98** | **C** |
| **24** | **D** | **49** | **A** | **74** | **B** | **99** | **A** |
| **25** | **C** | **50** | **B** | **75** | **B** | **100** | **B** |